# Lakshmi Stava

# લક્ષ્મીસ્તવઃ

## Document Information

Text title : Lakshmi Stava

File name : lakShmIstavaH.itx

Category : devii, lakShmI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# Lakshmi Stava

# લક્ષ્મીસ્તવઃ

સુધાસારાસારાદપિ બહુલસારા કુવલયા-
વલીદામશ્યામા શુભવિભવસામસ્ત્યજનની ।
મમ શ્રેયો ભૂયો વિતરતુ સુધાસિન્ધુદુહિતુઃ
કૃપાતુઙ્ગાપાઙ્ગોલ્લસદસમશૃઙ્ગારલહરી ॥ ૧॥

જગત્સ્રષ્ટા સ્રષ્ટા શ્રુતિભિરનવદ્યપ્રસૃતિભિ-
ચતુર્મુખ્યા મુખ્યાનપિ ગુણલવાંસ્તે કવયિતુમ્ ।
રમે નેષ્ટામીષ્ટાં તવ શિશુરયં ત્વત્કરુણયા
ગ્રહીતું સ્તમ્બોઽપિ પ્રભવતિ સિતાં સૈકતયુતામ્ ॥ ૨॥

મહિમ્નઃ પારં તે દ્રુહિણપુરજિત્તારક જિતઃ
ક્ષમન્તે વાનન્તે જનનિ ન ચતુષ્પઞ્ચષમુખાઃ ।
યદિ ત્વન્યે મન્યે જલધિપતિકન્યે કવયિતું
યતેરન્નીશેરન મશકશિશુકાઃ સિન્ધુગિલને ॥ ૩॥

નૃપાન્ નાવન્નાવં ભવજલધિનાવં તવ કૃપાં
રમે નીચાઃ કેચિજ્જહતુ ભુવિ નિર્વિણ્ણરસનાઃ ।
કિમેતૈર્જાહ્નવ્યાસ્તટભુવિ ખનદ્ભિઃ પ્રવણતા-
દુરાપોદ કૂપં ત્વયિ કૃતભરોઽહં તદધુના ॥ ૪॥

તવ સ્તોત્રં ચિત્રં ત્રિભુવન પવિત્રં જિગદિષોઃ
સમન્તાજ્જૃમ્ભન્તામમલવદને પદ્મસદને ।
નટદ્ભાષાયોષાકરકમલભૂષાપરિકન-
ન્મણીભૂષોન્મેષપ્રતિમગતયો મે ભણિતયઃ ॥ ૫॥

શ્રિયામેકં મૂલં દ્વિરદગતિનમ્રં ત્રિવિધચિ-
ત્કલાપં સંસેવ્યં સવિનતિ ચતુષ્પઞ્ચષમુખૈઃ ।
પ્રદીપત્સપ્તાશ્વં પ્રભવતુ સદાષ્ટાપદપદં
મહાલક્ષ્મ્યાશ્ચિત્તે મમ નવલસદ્યૌવનદશમ્ ॥ ૬॥

સરસ્વત્યા સત્યા વલમથનસત્યાપ્યસુલભં
    ભવદ્દાસ્યં પશ્યઞ્જિગદિષતિ યસ્તે તદુપમામ્ ।
અયં નિમ્બં બિમ્બં વિવદિષતિ પદ્મે સુરતરોઃ
    સમં લોષ્ટં સ્પષ્ટં હિ કલયિષતેઽષ્ટાપદગિરેઃ ॥ ૭॥

ત્વયા જુષ્ટસ્તુષ્ટઃ કમપિ ખલુ દુષ્ટં બલિભુજં
    સમત્રાસ્ત ત્રસ્તં પરમપુરુષો રુક્મિણમપિ ।
તવાસાન્નિધ્યેઽહન્ દશવદનચૈદ્યાદિચપલા-
    નિતીદં તે લક્ષ્મિ પ્રથયતિ ઘૃણૈકપ્રવણતામ્ ॥ ૮॥

જગદ્રક્ષાશિક્ષાપ્રભૃતિમહિમાનં ભગવતિ
    ત્વદેકાન્તં પ્રાહુઃ કતિચિદપરે ત્વત્પતિગતમ્ ।
નયાપેતૈરેતૈરલમખિલવેદાન્તકલને
    પ્રતીમસ્તન્મિશ્રં ખલુ શુભવતોરમ્બ ભવતોઃ ॥ ૯॥

તવાનલ્પં તલ્પં ફણિકુલપતિસ્તદ્દ્વિરિપતે-
    રુરોરત્નં પત્નં તવ ભજતિ ભદ્રાસનગતિમ્ ।
ત્રયો વેદાઃ સૌધા જનનિ કમલં સદ્મ વિમલં
    ભવદ્ભૂમા ભૂમાવહહ ન પદં વાઙ્મનસયોઃ ॥ ૧૦॥

મહાવૃત્તે યત્તે સકરુણકટાક્ષપ્રસરણાત્
    પદં સ્વં સ્વં પ્રાપ્તા હરિહરવિરિઞ્ચિપ્રભૃતયઃ ।
જગચ્ચિત્તાયત્તા જગદુદયસત્તાવગતયો
    યતસ્તત્ ત્વં તત્ત્વં પરમિતિ રમે નિશ્ચિનુમહે ॥ ૧૧॥

નવોન્મીલન્નીલોત્પલદલકુલશ્યામલતમઃ
    કટાક્ષસ્તે હસ્તે કલયતિ નરં યં ભગવતિ ।
અયં રઙ્ગદ્ભૃઙ્ગોત્કટકરટિગણ્ડસ્થલગલ-
    ન્મદસ્યન્દેઽલિન્દે ચરતિ ચરિતં તેઽદ્ભુતમિદમ્ ॥ ૧૨॥

તવ ભ્રાતા ત્રાતા કુવલયગરિમ્ણસ્તવ પિતા
    મહાસત્ત્વો ધત્તે ભુવિ ભુવનસામ્રાજ્યમખિલમ્ ।
ક્ષમઃ સૃષ્ટૌ પુષ્ટૌ પતિરપિ નિઘૃષ્ટૌ ચ જગતાં
    રમે સામ્રાજ્યં તે ક ઇહ વિવરીતું પ્રભવતિ ॥ ૧૩॥

રણે શક્તિં યુક્તિં નયવિધિષુ રક્તિં ગુણગણે

ગુરૌ ભક્તિં સક્તિં કૃતફણિતિવૃક્તિં ચ સદસિ ।
વહન્તોઽપિ ક્ષ્માપા દધતિ લઘુતાં ત્વદ્વિમુખિતા-
સ્ત્વયા દૃષ્ટો દુષ્ટોઽપ્યખિલગુણજુષ્ટોઽમ્બ ભવતિ ॥ ૧૪॥

કૃપાવર્ષોત્કર્ષાદમરશિખિહર્ષં વિદધતં
પરવ્યોમ્નિ સ્ફીતં સકલફલદં કૃષ્ણજલદમ્ ।
શ્રિતા વિદ્યુલ્લેખા ચલનરહિતા નિત્યમહિતા
રમા તૃષ્ણાપૂર્ત્યૈ વસુવિસરમાકલ્પયતુ નઃ ॥ ૧૫॥

પ્રવાલશ્રીરોષ્ઠે કચભુવિ ઘનાલિદ્યુતિરુરો-
ભુવૌ કુમ્ભાવબ્જપ્રથિતકદનં ચાપિ વદનમ્ ।
કટી ગોત્રાભોગાસ્પદમહિમહીભૃત્તટવસ-
ત્યુરઃસદ્મે (પદ્મે) ભગવતિ તતસ્ત્વં જયમયી ॥ ૧૬॥

મુખે ચાન્દ્રીં શાઙ્ખીં ગલભુવિ ચ મૈનીં નયનયો
રુચિં સૌધીં વાચિ ત્રિવલિષુ ચ વૈચીં પ્રપદયોઃ ।
પદોઃ કૌર્મીં પાદ્મીં નખતતિષુ મૌક્તીં ચ દધતી
વ્યનક્ષિ શ્રી(રબ્ધે)ર્લયમનુવહન્તિ સ્ત્રિય ઇતિ ॥ ૧૭॥

સુમોલ્લાસો હાસો ભ્રમરનિકરાસ્તેઽમ્બ ચિકુરા
મધુદ્રોણી વાણી ભગવતિ કરૌ પલ્લવવરૌ ।
ભુજૌ શાખાભેદૌ નખમુખતતિઃ કોરકતતિ-
સ્તતો મન્યેઽમ્બ ત્વાં મનસિ લલિતાં કલ્પલતિકામ્ ॥ ૧૮॥

ત્રં વક્ત્રં વચનરચને માધવરુચિઃ
કચઃ કૃષ્ણશ્ચક્રપ્રકૃતિમપિ રોમાલિરયતે ।
વલગ્ને સંલગ્ના હરિવિહતિરિત્યમ્બ સતતં
પદં ધત્તાં ચિત્તામ્બુરુહિ મમ તે વિષ્ણુમયતા ॥ ૧૯॥

સુધાંશુસ્તે વક્ત્રં સુમવિલસિતં મન્દહસિતં
સુધા વાણી વેણી સુરપતિમણીભઙ્ગસરણિઃ ।
સુષિર્નાભિર્બાહૂ સુરતરુલતાસુન્દરતમૌ
સુવર્ણપ્રાગલ્ભ્યં તવ જનનિ ગાત્રેષુ જયતિ ॥ ૨૦॥

ત્રિવૃદ્ભાવં પઞ્ચીભવનમપિ ચ ક્વાપિ સમયે
યતઃ સ્વૈરં નારાયણિ તવ બરીભર્તિ કબરી ।
તમો નામ શ્યામં ત્રિગુણસમતાયાં યદુદિતં

જગન્માતસ્તત્ તે તદિતિ હૃદિ તાં નિશ્ચિનુમહે ॥ ૨૧॥

સુધાસાન્દ્રશ્ચન્દ્રસ્તવ સુમુખતાં પ્રાપ્ય નતદૃક્
ચકોરીનારીણાં મુદમપિ ધુરીણાં રચયતિ ।
ઇતિ શ્રુત્વા મત્વા સ્વયમપિ તદાશિશ્રયિષયો-
દિતાં શ્યામાં શ્યામાં તવ કિરણયામામ્બ કબરીમ્ ॥ ૨૨॥

કિરીટાદ્રેર્નીલોપલફલકસોપાનપટલી
શિરઃપશ્ચાચ્ચક્રદ્યુમણિતનુસઞ્જાતયમુના ।
શ્રિયં દદ્યાદુદ્યત્સદનકમલામોદવશવ-
ર્ત્યલિશ્રેણી વેણી રતિપતિકૃપાણી જનનિ તે ॥ ૨૩॥

મણીભૂષાવેષાવરુણહરિણાઙ્કૌ નિગલિતૌ
તમઃશ્રેણી વેણીધૃતમકૃત સીમન્તમભિતઃ ।
જગન્માતર્યત્તત્તિમિરનિગલોપાઙ્ગવલય-
પ્રણાલીવારાલી ભવદલકપાલી વિજયતે ॥ ૨૪॥

ગરાદુગ્રે વ્યગ્રે ગલતિ ગતભીઃ કન્તુરુદધે-
ર્જનિત્રીભિઃસ્ત્રીભિર્જિતવલભિદાસ્વેન્દ્રજિદિતિ ।
પ્રથાં કૃષ્ણં જિષ્ણુસ્તવ જનનિ વેણીકપટતો-
ઽસૃજન્માયામેઘાવલિમુદિતશૈલીમુખરુચિમ્ ॥ ૨૫॥

સ્ફુરચ્ચૂડારત્નદ્યુમણિયમુનાયાઃ કચતતે-
સ્ત્રિકાકુલ્યા શ્રોણીગિરિયુગલગા તેઽમ્બ જયતુ ।
કલાં કાલોન્મીલત્કનકકદલીકન્દલદલા-
ન્તરાલીનાં લીનામિવ પિદધતી યા વિલસતિ ॥ ૨૬॥

મહાનીલાવાલે મૃગમદરજોલેશકલિતે
જલં કાલે કાલે રવિદુહિતુરાલિપ્ય ચ યદિ ।
તમાલં પુષ્ણીયુર્યદિ ચ પરિપુષ્યેત્ સ કમલે
તદા તન્મઞ્જર્યઃ કથમપિ દધીરન્ કચરુચિમ્ ॥ ૨૭॥

અહેર્જેતા બર્હિઃસ્થિતિભૃદિનજાતાનુકૃતિરુ-
ત્પલાદેશઃ પાશી મરુદધિપતિઃ શ્રીદવિભવઃ ।
શિવઃ સ્રષ્ટા કૃષ્ણસ્તવ કચભરોઽષ્ટાવપિ દિશાં
પતીન્ મૂર્તીસ્તિસ્રઃ સ્વયમનુવિધત્તે ભગવતિ ॥ ૨૮॥

હલાઘાતાદ્ ભીતાં શરણમુપયાતાં વિનિહિતાં
    ત્વયા પશ્ચાદ્ભાગેઽવિતુમકરુણોદ્યત્કરુણયા ।
રવેઃ કન્યાં મન્યામહ ઉદધિજે તેઽમ્બ કબરીં
    ભયાત્ કૃષ્ણા વેણીત્યનુકલિતનામાન્તરધૃતિમ્ ॥ ૨૯॥

સુવાસધ્રીચીભિર્વચનરચનાભિર્નિચુલિતં
    લસદ્ભાસોલ્લાસચ્છવિશમિતનમ્રાર્તિતિમિરમ્ ।
શશાઙ્કં શઙ્કન્તાં કતિચન મુખં તેઽમ્બુજસખં
    ન ચૈતત્ સમ્મન્યે સ હિ જનનિ જન્માદિકુટિલઃ ॥ ૩૦॥

જલે સ્થિત્વા કૃત્વા મુખમભિમુખં ચાપિ સવિતુ-
    ર્ભ્રમદ્ભૃઙ્ગારાવચ્છલમનુજપાપ્યાપ નલિની ।
ન તે વક્ત્રચ્છાયાલવમપિ નિજે સ્મેરજલજે
    વિધૌ વૈરં સ્વૈરં વહતિ ન તપોઽપ્યમ્બ ભવતિ ॥ ૩૧॥

સદાદર્શસ્ફૂર્તિં દધતિ વદને તેઽબ્જસદને
    ક્વ ચન્દ્રસ્યોન્મેષઃ સમ ઇતિ કથા તસ્ય વિતથા ।
જગન્માતસ્તસ્માત્ સ બહુલકૃશસ્તાવકમુખ-
    શ્રિયૈ ધત્તે તપં ભવશિરસિ ગીર્વાણશિરસિ ॥ ૩૨॥

સદા નાસામુક્તાભરણમિષરોહિણ્યુપગતં
    પતિં દૃષ્ટ્વા વક્રં પરુષરુષમેકત્ર મિલિતામ્ ।
ચહન્તીં તારાલીમિવ સવુસૃણાં મૌક્તિકમયીં
    લલન્તીં શ્રીકાન્તે તવ જયતુ સીમન્તસરણિઃ ॥ ૩૩॥

મણીતાટઙ્કાગ્ર્યચ્છુરણકચનીલાવરણસ–
    દ્રદશ્રેણીમુક્તાચ્છુરણસુપથે મન્મથરથે ।
વચોવિજ્ઞેયાશ્વે તવ મુખમયે પાર્શ્વકલિતં
    કપોલદ્વન્દ્વં તે મુકુરયુગમમ્બામનુમહે ॥ ૩૪॥

જયન્ મૂર્તીસ્તિસ્રસ્તિસૃભિરિષુભિર્મધ્યફલકે
    લિખન્ રોમાલીં તે જયલિપિમુદીર્ણત્રિવલિકામ્ ।
સ્મરઃ શ્રાન્ત્યાનેનાનનશશિનિ દત્તૌ સકમલો-
    ત્પલારોપૌ રોપૌ કિમુ જનનિ દૃગ્ભ્રૂયુગમિદમ્ ॥ ૩૫॥

મહાસૌરભ્યં તે મુખનલિનમાસ્વાદિતુમણો-
    રણીયસ્ત્વાદાસ્તે કિમુ તિલકરૂપેણ સ હરિઃ ।

ભવત્ફાલે નો ચેન્નિરતિશયસૌરભ્યભરિતે
    પ્રકર્ષઃ કસ્તૂર્યાઃ ક ઇવ ભવિતા લોકજનનિ ॥ ૩૬॥

ભવદ્વક્ત્રચ્છાયાં કલયિતુમિહામ્ભોજશશિનૌ
    તપસ્તપ્ત્વા રાત્રિન્દિવમનુકલ પુષ્કરતટે ।
ગતાવર્થાનર્થૌ પરિમલકલઙ્કપ્રસરણા-
    દતો હેતોરેતૌ મમ જનનિ વૈરં કલયતઃ ॥ ૩૭॥

ન સૌરભ્યં ચન્દ્રે ન ચ સરસિજે રમ્યમમૃતં
    સદાદર્શશ્ચામ્ભોરુહ વનવિહારૈકરસિકે ।
વિધત્તે કસ્તૂરીતિલકકલને સેવકવિધિં
    તતસ્તે વક્ત્રેન્દોરુપમિતિપદં વ્યોમકમલમ્ ॥ ૩૮॥

વૃષોલ્લાસાવાસં તવ વદનચન્દ્રં ભ્રમરકૈ-
    ર્વૃતં સામ્યં પ્રેપ્સન્નલિકુલયુતઃ સન્નુપગતઃ ।
તતો રાકાચન્દ્રો મમ જનનિ દૈવજ્ઞવિબુધૈ-
    રિહોચ્ચોઽયં નીચોઽયમિતિ વિવૃણદ્ભિઃ પરિહૃતઃ ॥ ૩૯॥

હરેર્વક્ષોભાગે કમલદલમાલ્યભ્રમભૃતઃ
    શ્રયદ્દારિદ્ર્યાદ્યુદ્દલનશતકોટિપ્રસૃતયઃ ।
દદન્તાં કલ્યાણં મમ જલધિકન્યે જનનિ તે
    કટાક્ષાઃ કાલિન્દીકુવલકુલકૂલઙ્કષરુચઃ ॥ ૪૦॥

કુરઙ્ગસ્તે રઙ્ગેશ્વરિ નયનશૃઙ્ગારવિજિતો
    જહત્તન્દ્રં ચન્દ્રં શરણમગમત્ ત્વન્મુખરુચા ।
સ ચાપાસ્તો હસ્તાર્પિતમકૃત શમ્ભોર્મૃગમતઃ
    સ્ફુરત્સ્વૈશ્વર્યેષ્વષ્ટસુ ચરતિ ભિક્ષાં પશુપતિઃ ॥ ૪૧॥

દૃશોસ્તે સામ્યેપ્સર્ભગવતિ ચકોરૈઃ સહ મૃગો
    ભવદ્વક્ત્રામિત્રં હ્યકૃત શરણં શીતકિરણમ્ ।
ઇતિ દ્વેષાદાસ્યે મૃગમદમદાસ્તસ્ય રુધિરં
    ધ્રુવં નો ચેત્ કા સ્યાદુપકૃતિરિહાત્યન્તસુરભૌ ॥ ૪૨॥

શ્રુતિશ્રેણીવેણીકુસુમરસપા ણિઙ્ગય(મ) પદ-
    પ્રવાલશ્રીર્નીલોત્પલવિસદૃશૌ તાવકદૃશૌ ।
શિશૂ ખઞ્જન્યા ઇત્યનુમનુમહે યત્પ્રસરણા-
    સ્પદે નૃત્યન્ત્ય(ન્ચે) સદવધયઃ સિદ્ધિનિધયઃ ॥ ૪૩॥

પુરા પારાવારે સ્ફુરદમૃતસારે સમુદિતઃ
    સરોજાનાં દ્રોગ્ધા જનનિ ભવતી ચેત્યશ઼ૃણવમ્ ।
કરોષિ ત્વં દૃષ્ટ્યા કલિતદરહાસપ્રસરયા
    પરં સિન્ધૂનિન્દૂન્ ભગવતિ સુધૈકાત્મવપુષઃ ॥ ૪૪॥

દશાકૃત્યા સત્ત્વં નખરમિષતોઽલક્તકમિષા-
    દ્રજો રક્તં વ્યક્તં ભગવતિ પદો તેઽશ્રયદિતિ ।
તમોઽક્ષ્ણોરર્કેન્દ્વોઃ શરણમગમત્ કજ્જલમયં
    ન ચેત્ ત્વદ્દૃષ્ટાનાં કથમિવ તમોઽમ્બ પ્રસરતિ ॥ ૪૫॥

ધનુર્મીનૌ ભ્રૂદૃગ્યુગમજનિષાતાં સમકરૌ
    કુચૌ કુમ્ભૌ શ્રોણી કટકમિથુનાભાં કલયતઃ ।
કચેઽસ્ત્યુન્મેષોઽલિશ્રિત ઉદધિકન્યે કૃતષિય-
    સ્તદેતે સૂક્ષ્મત્વાજ્જનનિ ન-વલગ્નં વિવૃણુતે ॥ ૪૬॥

સ્વદૃક્શીતાશીતાંશ્વનુકલનનેમસ્ફુટમુખો-
    ન્મરન્દસ્તે હસ્તે સિતકમલકોશોઽતિલલિતઃ ।
મહાલોકાનીકાત્મક શિશુપરીપોષધૃતસ-
    ત્પયઃશઙ્ખાશઙ્કાં દધદખિલપુષ્ટિં દિશતુ નઃ ॥ ૪૭॥

ફણાવત્પર્યઙ્કપ્રણયિનિ તવાપાઙ્ગતુલના-
    ગુણાકાઙ્ક્ષં સ્વેન્દીવરમુપનતાર્થં કલયિતુમ્ ।
સ્વબિમ્બાવાલાન્તર્ન્યધિત સુવયા પુષ્ટિમયતા-
    મિતિ સ્તોકાલોકાસ્તદુપગતિમઙ્કં વિવૃણતે ॥ ૪૮॥

ત્રયો ભાગાઃ પ્રાપ્તા ઇતિ દનુસુતાનાં દિવિષદાં
    સુધાયાં તત્ર દ્વાવસુરવિષયાવન્તરદધાત્ ।
દૃશોસ્તે મોહિન્યાકૃતિરુદધિકન્યે તવ પતિ-
    સ્તવાપાઙ્ગાસઙ્ગાત્ તદિહ જગદાનન્દમયતે ॥ ૪૯॥

જગુઃ પ્રત્નં રત્નં કતિચિદપરે વિદ્રુમદલં
    પરે બિમ્બં નિમ્બચ્છદનસદૃશભ્રૂર્ભગવતિ ।
તવોષ્ઠં વક્ત્રેન્દોઃ સવિધભુવિ ભક્ત્યૌષધિકુલૈઃ
    પરિન્યસ્તં મન્યે લલિતમુપદાપલ્લવમિતિ ॥ ૫૦॥

પયઃ પારાવારે ફણિનિ શયિતાયાઃ સદયિતં

સુધાભિર્ગણ્ડૂષાનુષસિ રચયન્ત્યા રુચિલવાઃ ।
તવોષ્ઠાદ્યે મિશ્રાઃ પયસિ ત ઇમે શૈલકષણાદ્
બહિર્વેલં ન્યસ્તા જનનિ દધતે વિદ્રુમપદમ્ ॥ ૫૧॥

પુરા પારાવારં મથિતવતિ વર્ગે દિવિષદાં
વિભજ્યાદાન્મોદાદમિતમમૃતં યો ભગવતિ ।
જિતાવિદ્યાં વિદ્યામપિ કલયતાં યોઽમૃતમદા-
દહો બિમ્બોષ્ઠાત્ તે મધુરમમૃતં વષ્ટિ સ હરિઃ ॥ ૫૨॥

સુધાં પ્રેપ્સન્નબ્ધેઃ સલિલમુપગૃહ્યામ્બુદમયૈઃ
કરૈર્મુક્તાસારો યદમૃતમુપાદત્ત તરણિઃ ।
બલાદ્ દર્શે ગૃહ્ણાત્યુદધિતનયે તત્સુહૃદિ તે
મુખે ન્યાસં કર્તું રદનવસનાન્તસ્ત્વદનુજઃ ॥ ૫૩॥

હરિઃ સાક્ષાલ્લાક્ષાલસિતમલિકં વીક્ષ્ય ભવતીં
ભવદ્રોષોન્મેષાં યદરુણિમલીલામપદિશન્ ।
પ્રસન્નાં ત્વાં કૃત્વા સમરમત માયી ત્વદધરઃ
સમે દદ્યાદદ્યાનુપમવિભવાનમ્બ જગતામ્ ॥ ૫૪॥

ઇયં સાક્ષાન્મોક્ષસ્રુતિરરુણબિમ્બા ત્વદધરા-
દુપર્યાસ્યે ચન્દ્રે સ્મિતમહસિ સાઙ્કે તિલકતઃ ।
લલન્તી મુક્તાલિર્જનનિ કનકાકલ્પતટિતા
શ્રિતં વેણી શ્રેણીકૃતિવરુણલોકં પ્રસજતિ ॥ ૫૫॥

સ્વયં સારગ્રાહી હરિરુદધિસમ્બન્ધનવિધા-
વધાદ્ રમ્ભાદિસ્ત્રીઃ સુરપતિગૃહે ત્વાં તુ જગૃહે ।
વ્યભાઙ્ક્ષીન્નિઃસારં ત્વમૃતમમરેભ્યસ્ત્વદધરે
સુવાં રસ્યાં પાસ્યઞ્જનનિ મમ સૌભાગ્યજનનિ ॥ ૫૬॥

સરોજાવાસિન્યા રદનવસનસ્ય પ્રતિમિતૌ
ગિરાં ભાવં તાવદ્ વિરમયત શૃઙ્ગારકવયઃ ।
શરચ્ચન્દ્રે યાવદ્ દિનદિનમનુપ્લુત્ય સુધયા
પ્રરોહન્ પુણ્ડ્રેક્ષુઃ ફલતિ ફલમારુણ્યભરિતમ્ ॥ ૫૭॥

મમ શ્રેયો ભૂયો વિતરતુ સુધાસિન્ધુદુહિતુ-
ર્મહીયાન્ બિમ્બોષ્ઠઃ પ્રણમદભયાલાપમધુરઃ ।
યમુત્પ્રેક્ષાઞ્ચક્રે હરિરિહ રદૈર્મૌક્તિકવૃતે

સુધાપારાવારે સ્મિતવપુષિ ચિન્તામણિરિતિ ॥ ૫૮॥

જપાટોપાદાપ્તં (ત્તં) ભવદધરબિમ્બેન મધુજિ-
ત્પદં મુક્તા જાતાસ્તદનુકલનાદેવ ચ રદાઃ ।
અદઃ સાઙ્ગત્યેન સ્મિતમવિરતોલ્લાસભરિતં
ન ચિત્રં યન્માતર્ભજતિ સુમનઃસમ્પદમિતિ ॥ ૫૯॥

જગન્માન્યે મન્યે જનનિ જલજાતપ્રહરણો
જગન્નેતુશ્ચેતોમૃગમૃગયુરેતન્નિપતિતમ્ ।
ભવન્નાભીમધ્યે નિજહૃદિ વિદન્નાક્ષિપદ્દુપ-
ર્યહો કુન્તં રોમાવલિઘપુષમૈન્દીવરમિતિ ॥ ૬૦॥

રતિઃ કામશ્ચેમાવસિતતમરોમાલિશિલયા
મિતે મધ્યક્ષેત્રે પ્રથમરસસસ્યાન્યતનુતામ્ ।
યતો વક્ષોઽન્તસ્તત્કલિતફલરાશિદ્વયમિદં
જગન્માતઃ સ્ફીતસ્તનયુગલરૂપેણ લસતિ ॥ ૬૧॥

ફણીશાનક્ષોણીધરરમણમન્દારવિટપ-
દ્ભુજાલમ્બામમ્બ ત્રિભુવનસમુજ્જીવનલતામ્ ।
તનૂ વિઘ્નઃ પદ્મે તવ યદુદિતોરોજફલયોઃ
પદં રોમાલીદોહદમૃદુલધૂમાલિરચતે ॥ ૬૨॥

ગ્રહોત્કર્ષામર્ષાત્ તવ નયનદાક્ષિણ્યવિરહં
વિદન્નિન્દુઃ પત્નીઃ પ્રપદનપરાસ્તેઽમ્બ પદયોઃ ।
નખાકૃત્યા કૃત્વા તવ સુમુખતાં પ્રાપદિતિ ત-
તકલઙ્કું રોમાલીં ત્વમસિ કિમુ ગર્ભીકૃતવતી ॥ ૬૩॥

દ્વિજાનાં રાજાયં તવ વદનતામેત્ય મહિતાં
વિધાય સ્વં ભાસ્વત્કરગતમરિદ્વન્દ્વમનિશમ્ ।
બલાદ્ ગૃહ્ણન્ રોમાવલિમયતમઃ શ◌ૃઙ્ખલિકયા
ન્યબધ્નાદમ્બાસ્યા વલય ઇવ નાભિર્વિલસતિ ॥ ૬૪॥

જયશ્રીરોમાલીં સ્મરનૃપકનત્કઞ્ચુકપટી-
કુટીબદ્ધાં રજ્જું કતિચિદસિતાં તેઽભિદધતામ્ ।
કુચૌ લીલાશૈલૌ પ્રતિરતિ રતીશોપકલિતાં
ક્રમોન્મૂલં નીલોપલસરણિમેનાં મનુમહે ॥ ૬૫॥

પ્રભોઃ પઞ્ચાસ્ત્રસ્ય સ્તનગિરિજુષઃ કેતનકૃતે
ધ્રુવં નીતો નાભીસરસસરસઃ કોઽપિ મકરઃ ।
યદઙ્ઘ્યાગ્રાલગ્ના નયનસમયાકૃષ્ટવિતતા
લતાશૈવાલીવ સ્ફુરતિ તવ રોમાલિરનઘે ॥ ૬૬॥

સ્મરઃ સત્યા રત્યા સહ કુચગિરિપ્રાન્તભુવિ તે
ચરન્ બન્ધં કઞ્ચિદ્ વિહરતિ કિમીપ્સુર્હરજિતમ્ ।
સુતં યસ્માદમ્બાપતતિ નિભૃતા બન્ધરતતત્-
પૃથુશ્રોણીવેણી સ્ફુરતિ તવ રોમાવલિમયી ॥ ૬૭॥

જગદ્રક્ષાશિક્ષાદ્યનુગુણગુણાલાનગલિતં
હરેશ્ચિત્તં મત્તદ્વિપમુરુકુચાદ્યન્તરગતમ્ ।
પથા નેતું ચેતોભવભૃતિભૃતા પાણિવિધૃતા
રમે રોમાલિસ્તે ધ્રુવમજનિ નીલોત્પલસૃણિઃ ॥ ૬૮॥

રમે નેયં નાભિઃ સ્મરવિરચિતાવાલવલયો
ન રોમાલી તસ્મિન્નુપજનિતશૃઙ્ગારલતિકા ।
સ્તનૌ નેમૌ તસ્યાં રથપદ વિહઙ્ગદ્વયમિદં
મુખેન્દોરાલોકાન્નિભૃતમિવ ભીત્યા વિલસતિ ॥ ૬૯॥

અસઙ્ખ્યાકા લોકાસ્તવ જનનિ પાકા ઇતિ કૃપા-
મપારાં બિભ્રાણા સમુદમુદયન્તી જલનિધેઃ ।
સહામૂભ્યાં ચાભ્યામમૃતકલશાભ્યાં પૃથુલસત્-
કુચાભ્યામધ્યષ્ઠાઃ કિમુ વિપુલવક્ષો ભગવતઃ ॥ ૭૦॥

હરે રક્ષોદક્ષોત્કરહૃદયવિક્ષોભકરવ-
સ્ફુરદ્વીરો નૈવાન્વભવમિહ શૃઙ્ગારમિતિ કિમ્ ।
તપસ્તપ્ત્વા શઙ્ખો જનનિ ગલતામેત્ય કિલ તે
યયૌ શૃઙ્ગારિત્વં મુરહરકરાશ્લેષવશતઃ ॥ ૭૧॥

તવ સ્થાનં પદ્મં તવ ચ તનયઃ પદ્મવસતિઃ
કરે ધત્તે ચૈતત્ તદિદમિહ કર્ણાગ્રનિહિતમ્ ।
વિતન્યાત્ પૈશુન્યં સ્વવિષય ઇતીન્દુર્દ્વિરુદગાત્
સમુક્તાતાટઙ્કાકૃતિરવહિતસ્તે શ્રવણયોઃ ॥ ૭૨॥

સુધાસધ્રીચીનપ્રચુરવચનાલીવિરચના-
નદીપારાવારીભવદધરબિમ્બાન્તિકભુવોઃ ।

તરઙ્ગગ્રન્યસ્તા ક્રમિકનવમુક્તાવલિરિવ
    સ્ફુરન્તી લક્ષ્મિ સ્તાન્મમ શુભકરી દન્તસરણિઃ ॥ ૭૩॥

ધૃતોન્મેષસ્ત્વેષ પ્રસભમરુણોઽમ્બ ત્વદધરો
    વૃષાતન્દ્રશ્ચન્દ્રો મુખમુદધિકન્યે બુધનુતે ।
જગન્માન્યશ્રોણીકટકગુરુભાવઃ પરમનુ-
    ગ્રહોચ્ચત્વં કસ્તે જનનિ વિવરીતું પ્રભવતિ ॥ ૭૪॥

ત્વયા પદ્મં સદ્મીકૃતમિતિ તદાશ્રિત્ય સતતં
    મૃણાલી ત્વદ્બાહુદ્વયમૃદુલતાં કામમયતામ્ ।
ન તત્ તસ્યાઃ શસ્યં ભવતિ જડસંસક્તવિહૃતે-
    રિતિ જ્ઞાત્વા હંસાસ્તવ ગતિવિદસ્તાં વિલુનતે ॥ ૭૫॥

જગત્કર્તા ભર્તા તવ તદખિલં ચ ત્વદુદરા-
    દુદીતં તચ્ચાણુ ધ્રુવમિતિ વિદન્ ગૌતમમુનિઃ ।
જગન્મૂલં હે શ્રીરણુમમનુતૈતન્ન હિ મૃષા
    હરિશ્ચાપ્યસ્ય સ્ત્રીં ચરણપરમાણોરજનયત્ ॥ ૭૬॥

ગતેયત્તં ચિત્તં પ્રણતજનતાયા ઘટયિતું
    ભવદ્ભાગાભોગૌ ભગવતિ કરૌ તે મનુમહે ।
યયોરેકૈકસ્મિન્નપિ વિશદયન્ત્યઙ્ગુલિલતા-
    પ્રપઞ્ચઃ પઞ્ચાનામિહ સુરતરૂણાં શ્રિત ઇતિ ॥ ૭૭॥

યદાલમ્બા અમ્બ પ્રચુરવૃજિનાશ્ચાપિ ન પુન-
    ર્ભવાસઙ્ગં સઙ્ગૃહ્ણત ઇતિ વદન્તિ શ્રુતિગણાઃ ।
પ્રપન્નૌ તાવેતૌ તવ મૃદુકરૌ સન્તતપુન-
    ર્ભવાસઙ્ગં રઙ્ગક્ષિતિરમણશૃઙ્ગારગૃહિણિ ॥ ૭૮॥

બિભીમઃ પાપેભ્યો ન વયમવયન્તસ્તવ દયાં
    યતસ્તે હસ્તાબ્જે જનનિ વરવિશ્રાણનવિધૌ ।
સમાહ્વાનં કુર્વન્ ખલખલખલેત્યેવમભયં
    ભવત્યા ભક્તાનાં કથયતિ કનત્કઙ્કણગણઃ ॥ ૭૯॥

મનોવાક્ચેષ્ટાભિર્મમ જનનિ શેષાચલપતેઃ
    પ્રતીપં નૈવાપઃ કથમપિ કદાચિત્ ક્વચિદિતિ ।
વ્રતં શ્રુત્વા સત્યાપિતમપિ સ મ(ત)ત્યાજ હિ કુતો
    યતો મુક્તાહારં ત્વમુપરિ કુચેઽલઙ્કૃતવતી ॥ ૮૦॥

સ્મિતક્ષીરામ્ભોધિઃ સમજનિ મુખેન્દોર્વિકસિતો-
ત્પલાભ્યાં તે દૃગ્ભ્યામપિ સમુદિતાપાઙ્ગયમુના ।
સ્તનાદ્રી પ્રાસૂત સ્તબકવ(દ)સૌ રોમલતિકા
રમે ચિત્રં કાર્યાત્ કરણજનિરેષા વપુષિ તે ॥ ૮૧॥

સશર્વાણી વાણી મઘવશુકવાણીમુખનમ-
ત્સુરીવેણીશ્રેણીપટુનટનમાણિક્યકટકમ્ ।
મનોવૃત્ત્યા ધૃત્યા મમ સમનુસૃત્યાપિ તવ પત્-
સરોજં દધ્રે શ્રીઃ કિમુ કમલિનીભાવવિભવમ્ ॥ ૮૨॥

મહાપદ્મે પદ્મે સતતકૃતસદ્મે યદુદિતે
મુકુન્દઃ શઙ્ખેનાભ્યષિચદલિનીલોપરકૃતે ।
પ્રપદ્યે પાદાબ્જં મકરકલિતં કચ્છપયુતં
તદેતદ્ યત્સઙ્ગાદ્ ભવતિ નવનિક્ષેપવિભવઃ ॥ ૮૩॥

પ્રભોઃ પ્રાભૂન્નાભેર્નભ ઇતિ બભાષે ભગવતી
શ્રુતિઃ સાભૂન્મધ્યાન્નભસ ઇતિ બાભાતિ હૃદિ નઃ ।
હૃદશ્ચન્દ્રઃ સાન્દ્રોઽભવદિતિ તયાભાણિ કમલે
નખાલિસ્તે ચન્દ્રાન્નિયુતમયુતં ચાપિ સૃજતિ ॥ ૮૪॥

કદાચિત્કૈલાસે જનનિ વિચરન્ત્યાં ત્વયિ પદ-
શ્રિયા શોણેનાયં રજતગિરિરેષોઽરુણ ઇતિ ।
ભ્રમાદ્રુદ્રેઽન્યાદ્રિં જિગમિષતિ તે મન્દહસિતં
પુના રૌપ્યં કૃત્વારુણદિતિ રમે સંશ◌ૃણુમહે ॥ ૮૫॥

મહીયસ્યાં યસ્યાં પૃથગધિત ગાનોપનિષદા
નમઃ શર્વે ખર્વેતરવિનયપૂર્વં રચયતિ ।
રમે ચૂડાચુમ્બી શશધરશિશુઃ સા ચ તટિની
નખાનાં તાં કાન્તિં ક ઇવ વિવરીતું પ્રભવતિ ॥ ૮૬॥

કલા કાપિ ત્વં શ્રીઃ કિસલયપદા કીર્તિમહિતા
કુમાર્યબ્ધેઃ કૂર્મપ્રપદ્લસિતા કેશવયુતા ।
ત્વિષાં કોટિઃ કૈશિક્યસિ સપદિ તે કૌતુકમયઃ
કટાક્ષઃ કલ્યાણીઃ કરકનકધારાઃ કિરતુ નઃ ॥ ૮૭॥

ધ્રુવં ધાવન્ધાવં ધૃતપરિભવં સમ્પ્રતિ ભવં

નવં નાવન્નાવં નમદનુભવં તેઽમ્બ વિભવમ્ ।
અયં જીવઞ્જીવં શશભૃદુપજીવન્તમિવ માં
કટાક્ષઃ કલ્યાણીઃ કરકનકધારાઃ કિરતુ નઃ ॥ ૮૮॥

વરં વારન્ધારં પ્રપદનમરં રઞ્જિતવતાં
ધુરં ધારન્ધારં પ્રઘણભુવિ રંરંસ્યસ ઇતિ ।
સ્તુતે પારં રઙ્ગેશ્વરિ તવ કટાક્ષોઽચિરમસૂન્
દ્વિષાં છિન્દન્ ભિન્દન્નપિ ભસિતસાત્કૃત્ય રમતામ્ ॥ ૮૯॥

સ્વયં ધ્યાયન્ધ્યાયં સુગુણસમુદાયં રસમયં
વયં પાયમ્પાયં સદમૃતમયં શ્રીરિતિ પદમ્ ।
પ્રહૃષ્યામઃ સાયન્તનવિકચમલ્લીરસમિરુત્-
કબર્યમ્બાલમ્બ સધનમવિલમ્બં વિતર નઃ ॥ ૯૦॥

નમન્મુક્તાકારં મમ હૃદયશુક્તૌ જનનિ તે
શરીરં તં મન્ત્રં સ્વયમપુનરુક્તં બહુ જપન્ ।
પ્રપદ્યે સદ્યસ્ત્વાં તુરગરથહસ્ત્યાદિબહુલાં
તવાપાઙ્ગસ્તુઙ્ગસ્થિરકનકધારાં દિશતુ નઃ ॥ ૯૧॥

સુધાસિન્ધૌ સન્ધૌ ફણિપફણમાણિક્યમહસાં
પરીરમ્ભારમ્ભાનુભવસુભગં ભાવુકહૃદા ।
લસદ્રત્યાઃ પત્યા શ્રિય ઉદયદાનન્દકલિકઃ
કટાક્ષઃ કલ્યાણીં કલયતુ સ નઃ કાઞ્ચનખનિમ્ ॥ ૯૨॥

જહન્મૂલ્યં માલ્યં સકુતુકમલૌલ્યં વિતરિતુ-
ર્હરેર્યોઽભૂદ્યોઽભાદપિ ચિપિટમુષ્ટિં વિતરતઃ ।
યદાલમ્બઃ શમ્બપ્રહરણવતઃ કોઽપિ વિભવઃ
કટાક્ષોઽસૌ લક્ષ્મ્યાઃ પૃથુલધનધારા દિશતુ નઃ ॥ ૯૩॥

શ્રિયાં દાતુર્જેતુઃ શ્રિતસુરતરોરણ્ણયગુરોઃ
સ્વયં જિહ્વાસિંહાસનમધિગતા મે ભગવતી ।
મનોમૂર્તિઃ શ્રીસ્તે મનસિ વિલસન્તી વિગલિત-
પ્રપન્નાર્તિસ્ફૂર્તિર્વસુવિસરપૂર્તિં દિશતુ નઃ ॥ ૯૪॥

શિશોરિષ્ટાં ચેષ્ટાં જગતિ જનનીવાલિકલનાં
લતા પદ્મસ્યેવ ત્વસિ મમ કૃપાવારિધિમયી ।
વચઃ પૂજાવ્યાજાદ્રચિતમપચારં મમ રમે

ક્ષમિત્વા કલ્યાણીં કરકનકધારાં વિતર નઃ ॥ ૯૫॥

અતિપ્રત્નૈ રત્નૈ ....રત્નૈઃ સુરુચિરૈઃ
કૃતોન્મેષા ભૂષાઃ સુતટિદવિશેષા ધૃતવતી ।
સ્ફુરન્તી પદ્માન્તર્મમ કનકવર્ષાણિ કિરતી
રમેથાસ્ત્રાયેથા હરિપુરુષકારૈકરસિકે ॥ ૯૬॥

ત્રયીસૌધે ગાધે શઠમથનગાથેષ્ટસરણૌ
સ્થિરશ્રીમદ્રામાનુજમુનિવચઃ પુષ્પશયને ।
શયાના તન્વાના ભગવત ઇહાનન્દમયતાં
કટાક્ષૈવીક્ષેથાઃ પ્રપદનયુતાં દાસજનતામ્ ॥ ૯૭॥

કૃતાનન્દસ્યન્દં કનકજલધારાજલધરં
કટાક્ષં લક્ષ્મિ ત્વં કલય મયિ કારુણ્યવિવશા ।
વિષક્તો યસ્યાસૌ કરિતુરગરત્નાલિભરિત-
સ્ત્રયાણાં લોકાનાં દિશતિ વરસામ્રાજ્યવિભવમ્ ॥ ૯૮॥

ઇતિ શ્રીલક્ષ્મીસ્તવઃ સમાપ્તઃ ।
સ્તોત્રસમુચ્ચયઃ ૨ (૮૬)

The Lakmlstava (86) in ninety-eight verses
in the SikharinI metre is probably a work of
Bukkapattanam Venkatacharya, the author of the
other work in the codex. He mentions the name
of Surapuram Annayacharya in this stotra (v. 94).

Proofread by Rajesh Thyagarajan

*Lakshmi Stava*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*